# Shiva Stotram Vishnukritam

# શિવસ્તોત્રમ્ વિષ્ણુકૃતમ્

## Document Information

Text title : Shiva Stotram Vishnukritam

File name : shivastotramviShNukRRitaM.itx

Category : shiva, stotra

Location : doc_shiva

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description/comments : From Saurapurana

Latest update : December 11, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શિવસ્તોત્રમ્ વિષ્ણુકૃતમ્

(સૌરપુરાણે ૩૪-અધ્યાયાન્તર્ગતમ્)

અધર્મબહુલં કૃત્વા ત્રિપુરં મુનિપુઙ્ગવાઃ ।
મહાદેવમનુપ્રાપ્ય શરણં સર્વદેહિનામ્ ॥ ૫૧॥

તુષ્ટાવ સ્તોત્રવર્યેણ ભગવન્તં સનાતનમ્ ।
દણ્ડવત્પ્રણિપત્યાહ જલે સ્થિત્વા સમાહિતઃ ॥ ૫૨॥

નમઃ સર્વાત્મને તુભ્યં શઙ્કરાયાર્તિહારિણે ।
રુદ્રાય નીલકણ્ઠાય કદ્રુદ્રાય પ્રચેતસે ॥ ૫૩॥

ગતિસ્ત્વં સર્વદાઽસ્માકં નાન્યદેવારિમર્દન ।
ત્વમાદિસ્ત્વમનાદિસ્ત્વમનન્તશ્ચાક્ષયઃ પ્રભુઃ ॥ ૫૪॥

પ્રકૃતિઃ પુરુષઃ સાક્ષાદ્દ્રષ્ટા હર્તા જગદ્ગુરુઃ ।
ત્રાતા નેતા જગત્યસ્મિન્દ્વિજાદીન્દ્વિજવત્સલઃ ॥ ૫૫॥

વરદો વાઙ્મયો વાચ્યો વાચ્યવાચકવર્જિતઃ ।
ધ્યેયો મુક્ત્યર્થમીશાનો યોગિભિર્યોગવિત્તમૈઃ ॥ ૫૬॥

હૃત્પુણ્ડરીકસુષિરે યોગિનાં સંસ્થિતં સદા ।
વદન્તિ સૂરયઃ સન્તં પરબ્રહ્મસ્વરૂપિણમ્ ॥ ૫૭॥

ભવન્તં તત્ત્વમિત્યાહુસ્તેજોરાશિં પરાત્પરમ્ ।
પરમાત્માનમિત્યાહુરસ્મિઞ્જગતિ યદ્વિભો ॥ ૫૮॥

દૃષ્ટં શ્રુતં સ્થિતં સર્વં જાયમાનં જગદ્ગુરો ।
અણોરલ્પતરં પ્રાહુર્મહતોઽપિ મહત્તરમ્ ॥ ૫૯॥

સર્વતઃપાણિપાદાન્તં સર્વતોઽક્ષિશિરોમુખમ્ ॥

મહાદેવમનિર્દેશ્યં સર્વજ્ઞં ત્વામનામયમ્ ॥ ૬૦॥

વિશ્વરૂપં વિરૂપાક્ષં સદાશિવમનુત્તમમ્ ।
કોટિભાસ્કરસઙ્કાશં કોટિશીતાંશુસન્નિભમ્ ॥ ૬૧॥

કોટિકાલાગ્નિસઙ્કાશં ષડ્વિંશાત્મકમીશ્વરમ્ ।
પ્રવર્તકં જગત્યસ્મિન્પ્રકૃતેઃ પ્રપિતામહમ્ ॥ ૬૨॥

વદન્તિ વરદં દેવં સર્વાવાસં સ્વયમ્ભુવમ્ ।
શ્રુતયઃ શ્રુતિસારં ત્વાં શ્રુતિસારવિદશ્ચ યે ॥ ૬૩॥

અદૃષ્ટમસ્માભિરનેકમૂર્તે દ્વિધા કૃતં યદ્ભવતા નુ લોકે ।
તદેવ દૈત્યાસુરભૂસુરાશ્ચ દેવાસુરાઃ સ્થાવરજઙ્ગમાશ્ચ ॥ ૬૪॥

પાહિ નાન્યા ગતિઃ શમ્ભો વિનિહત્યાસુરાન્ક્ષણાત્ ।
માયયા મોહિતાઃ સર્વે દૈત્યાસ્તે પરમેશ્વર ॥ ૬૫॥

યથા તરઙ્ગાઃ શફરીસમૂહા યુધ્યન્તિ(?) ચાન્યોન્યમપાન્નિધૌ તુ
જડાશ્રયાદેવ જડીકૃતાશ્ચ સુરાસુરાસ્તદ્વિજયે હિ સર્વે ॥ ૬૬॥

ઇતિ સૌરપુરાણે ચતુર્ત્રિંશત્યધ્યાયાન્તર્ગતં વિષ્ણુકૃતં
શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by PSA Easwaran

*Shiva Stotram Vishnukritam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*